वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# पुराणेषु विश्वबन्धुत्वभावना

**डॉ. अमृतलाल भोगायता**[१]

यद्यप्यत्र नैके विषयाः प्रदत्ताः तथा च सर्वेषामपि प्रदत्तविषयाणां विद्यतेऽनल्पं महत्त्वम्। अस्यां स्थितावपि "पुराणेषु विश्वबन्धुत्वभावना" विषयोऽयं मन्मानसं गुणोत्तंसस्य हंसस्य मानसमिव बलात् सहजप्रीत्या विशेषप्रासङ्गिकत्वाच्च कर्षति। सर्वेषु युगेषु विश्वबन्धुत्वभावना महत्त्वपूर्णाऽवर्ततैव। श्रीमद्भागवतपुराणे समुद्रमन्थनावसरे देवासुराणां, ततश्च रामरावणयुद्धं, ततश्च पाण्डवकौरवाणां, ततश्च षड्रिपूणां युद्धोल्लेखो दृश्यते। सत्युगे देवदानवसङ्घर्षकारणादेतस्या भावनाया अनिवार्यताऽऽसीत्, त्रेतायां स्वर्गस्थं युद्धं रामरावणव्याजेन भूमिं प्राप्तं परं द्वापरे देशयोर्मध्ये तद् युद्धं प्रवृत्तम्, मानवराक्षसयोर्मध्ये तद् युद्धमवर्तत, ततो द्वापरयुगे पाण्डवकौरवाणां मध्ये नामैकस्मिन्परिवारे युद्धं प्रवृत्तम्, कलौ तु मानवाः स्वस्थैः षड्रिपुभिरेव युध्यन्ते तस्मादेव स्वस्थैर्युध्यमाना न ते मानसिकशारीरिकस्वस्थाः। अत एव सम्प्रति "अभयं नः पशुभ्यः" इति न प्रार्थनीयं परं "अभयं नो मानवेभ्यः" इति तथा च "शं नो मित्रः शं वरुणः शं नो भवत्यर्यमाः" इत्यस्य स्थाने "शं नो मानवः" इति वक्तुमवसर आगतः। सत्युगत अधुना यद् वयं विलोकयामश्चेद् युद्धस्यान्तरं न्यूनीभूतमत एव सम्प्रति विश्वबन्धुत्वभावनाऽनिवार्या न च निवार्या। सर्वे देशा दैनन्दिनं शस्त्रवृद्धिपरायणाः सन्ति तेषां युद्धभूमिं प्रति धावतां विविधविदेशवाजिनां वागुरीभूता भविष्यन्ति इमानि वचांसि। पुरा विश्वबन्धुत्वभावनायै वेदैरित्थमुपदिष्टम्- "माता भूमिः पुत्रोऽहं पृथिव्या" इति अथर्ववेदस्य पृथिवीसूक्ते पुनश्च तत्रैव अथर्ववेदे "यत्र विश्वं भवत्येकनीडम्" सन्देशं प्रदाय निखिलमपि जगदेकगृहरूपेण समुपस्थापितम्। ऋग्वेदे तु "संगच्छध्वं सं वदध्वं शं वो मनांसि जानताम्" इति विलिख्य विश्वमैत्रीभावना दर्शिता। समतायाः सद्भावनायाः सामञ्जस्यं तत्रैव ऋग्वेदे पुनः इत्थमपि प्राप्यते।

**समानीव आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति ॥**

---

[१] प्राचार्यः, ब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियाद

इमे मन्त्रा अस्मान् मैत्रीभावरक्षणाय प्रेरयन्ति। वेदानामुपबृंहणं नाम पुराणानि। त एव विचाराः पुराणेषु सन्निहिताः सन्ति। मार्कण्डेयपुराणे-

**हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा।**
**सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या॥ - मा.पु.-८१/७**

अत्र भगवति समस्तजगतां हेतुः नाम जननी प्रोक्ता। इदं सर्वमपि विश्वं तस्या एव अंशभूतमिति भावः।

**देवी प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।**
**प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवी चराचरस्य॥ - मा.पु.-८८/२**

अत्रापि हे विश्वेश्वरि! जगदम्ब! त्वं समस्तं विश्वं पाहि, न केवलं भारतभूमिखण्डमित्यत्र ऋषेर्विश्वबन्धुत्वभावनापुष्टिं प्रयाति। महाभारते आदिपर्वणि भगवता व्यासेन प्रोक्तं यथा-

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥**

इत्यस्य आचरणं चरत एव शान्तिं जनयति। ईदृगाचरणमेव विश्वबन्धुत्वबीजमिति भावः। भगवद्गीतायां तु सर्वभूतेषु समभावेन दृष्टिः करणीयेति प्रोक्तं न तत्र भेदो वा द्वैतं रक्षणीयमिति यथा-

**समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।**
**विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥ - श्रीमद्भगवद्गीतायाम्-१३/२७**

सर्वत्र यदि परमात्मा एक एवेति मत्त्वा व्यवहारः क्रियते तर्हि समदृष्टिर्भविष्यति। धर्म एव सम्प्रति विश्वबन्धुत्वभावनायां साधकोऽयं जनानामज्ञानात् बाधकः संवृत्तः। अत एव "एकं सद्विप्रा बहुधा वदन्ति" स्वीकृत्य सर्वत्र समानमेव परमात्मानं पश्यति स एव पश्यति तं विहाय सर्वेऽन्येऽज्ञा अन्धा एव। भागवतपुराणे तु प्रोक्तं यथा-

**अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः।**
**मया सन्तुष्टमनसः सर्वाः सुखमया दिशः॥ - भागवते-११/१४/१३**

प्रायः युद्धस्य कारणानि इमानि भवन्ति यथा- धनलोभः-मतभेदः-असन्तोषश्च परमत्र प्रोक्तम् अकिञ्चनेन भाव्यम्, औदार्यं रक्षणीयम्, शान्तिः परिपालनीया समता रक्षणीया सन्तोषश्चावधारणीयः इत्थं क्रियते चेत् विश्वस्मिन् विश्वे सर्वत्र सुखमेवास्ते। "सर्वा आशा मम मित्राणि भवन्तु" कथनस्य आवश्यकतैव न भविष्यति। पुनः भागवतपुराणे प्रोक्तं यथा-

**अहिंसा सत्यमस्तेयकामक्रोधलोभता।**
**भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः॥ - भागवते-११/१७/२१**

अर्थात्- हिंसा न करणीया, सत्यं रक्षणीयम्, चौर्यं न कार्यम्, महेच्छा न करणीया, क्रोधो न पालनीयः, लोभो न वर्धनीयः, सर्वेषां जीवानां जनानां यथा हितं भवेत् तथा विचारणीयं स एव धर्मः। व्यवहारोऽयं विश्वबन्धुत्वपोषकः। पुराणेषु सर्वत्र व्यवहार एव तथा निर्दिष्टो येन वसुधैव कुटुम्बकम् इत्यस्य भावना सहजैवोद्भवति।

श्रीमद्भागवतपुराणे वैरभावस्त्याज्य इति प्रोक्तं "नास्ति मूलं कुतः शाखा" इति न्यायेन यदि वैरभाव एव न स्यात् तर्हि विश्वबन्धुत्वं सुखं निर्बाधं विकसत्येव। यथा-

**भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति। - भागवते-३/२१/२३**

पुनश्चेदमपि ज्ञेयं वर्तते।

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्॥**

अत्र न कस्यापि जातिविशेषस्य, जनविशेषस्य, राज्यविशेषस्य, देशविशेषस्य कृते प्रोक्तमपि तु सर्वजनसुखाय सर्वजनहिताय प्रोक्तम्। पुनश्च तत्रैव भागवते-

**सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु।**
**दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम्॥ - भागवते-११/३/२३**

अत्र मानवस्य परमाद्यं चेदमेव कर्तव्यं वर्तते यत् सर्वभूतेषु दया, मैत्री आदरश्च करणीय इति इयं शिक्षा यदि सर्वत्र भवति तर्हि न कुत्रचिदपि आतङ्कवादस्यातङ्को भवेत्।

अग्निपुराणे तु-

**एकमेवमिदं विद्धि न भेदः सकलं जगत्। - अग्निपुराणे-अ.३८०/५४**

अत्र यत्र भेदो भवति तत्र भयं भवति परं यत्र अद्वैतं तत्र बन्धुत्वमिति भावः।

भगवद्गीतायामपि प्रोक्तम्-

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ। - गीतायाम्-३/११**

अतः विश्वबन्धुत्वमेव श्रेयस्करमिति पुराणेषु मुक्तकण्ठेनोद्घोषितम्।

अन्यो न दृष्टः सुखदो हि मार्गः पुराणमार्गो हि सदा वरिष्ठः।
शास्त्रं विना सर्वमिदं न भाति सूर्येण हीना इव जीवलोकाः॥

शिवपुराणे, उमासंहितायाम्-१३/४२

अत्र पुराणेषु न केवलं मनुजानां समाजे परं पशूनां समाजेऽपि बन्धुत्वं रक्षणीयमिति उपदिष्टम्। यथा- भगवतः शिवस्य परिवारे पार्वत्या वाहनं सिंहः तथा च शिवस्य वाहनं वृषभः, गजाननस्य वाहनं मूषकः तथा च भगवतः शङ्करस्य कण्ठे सर्पः, षडाननस्य वाहनं मयूरः तथा च महादेवः नागेन्द्रहारो विराजते। एकस्मिन्नेव कुटुम्बके सति विरोधेऽपि बन्धुत्वभावादेव विगतवैराः सन्तः सर्वे एकस्मिन्नेव हिमगिरौ सुखं वसन्ति।

द्रोहबुद्धिः वैरबुद्धिः विनाशविचारः एतत् सर्वमपि हानिकरं भवति। तस्मादेव भागवतपुराणे वसुदेवमुखेन कंसं प्रति व्यासो वदति यथा-

तस्मान्न कस्यचिद् द्रोहमाचरेत् स तथाविधः।
आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयम्॥ - भा.-१०/१/४४

कस्यचिदपि द्रोहः क्रियते चेत् आत्मनः इह परत्र च कल्याणं न भवति तथा च शत्रवो वृद्धिं यान्ति सत्सु शत्रुषु कुतः सुखम्? अतः मानवेन अजातशत्रुणा भाव्यम्। अथर्ववेदेऽपि अयमेवोपदेशः प्रदत्तः यथा-

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभिहर्षत वत्सं जातमिवाघ्न्या॥
अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिदाम्॥
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥ ३/३०/१-३

अत्र मन्त्रेषु सर्वैः परस्परं सुष्ठु व्यवहारः कर्तव्य इति उपदिष्टम्। यतो हि-

न कश्चिद् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा॥

अतः सर्वैः स्वव्यवहारो रक्षणीयः। महाभारतेऽपि तदेव कथ्यते-

यदा न कुरुते पापं सर्वभूतेषु कर्हिचित्।
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा॥ - महाभारते आदिपर्वणि-७६/५२

**सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः।**
**कर्मणा मनसा वाचा स धर्मं वेद जाजले॥**

भगवद्गीतायां तु प्रोक्तम्-

"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि" एवं वेदेषु पुराणेषु च सर्वत्र विश्वबन्धुत्वरक्षणायैव उपदिष्टम्। यथा वृक्षः फलं यच्छति त्यजति चेत् स अन्येषां कल्याणं कुर्वन् आत्मनोऽपि कल्याणमधिगच्छति। यदि स परोपकारं न कुर्यात् तर्हि तदेव फलं तत्रैव गलितं सत् कृमिपूर्णं भूत्वा वृक्षमेव हन्यात् अतस्तस्य परोपकारो न वृथा। जना अपि अन्येषां कृते कल्याणं कुर्युश्चेत् तत्फलं पुनस्तैर्लभ्यत एव नात्र संशयावकाशः।

**पुराणानामयं सारः बन्धुत्वं रक्ष्यतां ध्रुवम्।**
**नष्टे भावेऽखिलं विश्वं नाशमेष्यति सर्वथा॥**
**भोगायताऽमृतेनेयं विश्वबन्धुत्वभावना।**
**अलिख्यत पुराणेभ्यः वेदमूला न निर्मूला॥**
**सतां चेतः प्रसादाय तद्विदां वेदनाय च।**
**विश्वबन्धुत्वभावोऽयं भूयात् भूतस्य भूतये॥**

**॥ अस्तु शम् ॥**